कस्य व्याख्यायां शिवदासेनोक्तं यथा।
"औद्भिदं निम्नप्रदेशादूर्द्ध्वमुत्तिष्ठज्जलम्" ॥
उद्भिदो जातं इत्यादि। यथा ॥
"तत् नस्त्रिविधं ज्ञेयं जाङ्गलौद्भिदपार्थिवम्"।
"भौममौषधमुद्दिष्टमौद्भिदन्तु चतुर्व्विधम्।
वनस्पतिर्व्वीरुधश्च वानस्पत्यस्तथौषधिः" ॥
"मूलत्वक्सारनिर्यासनाड़स्वरसपल्लवाः।
क्षाराः क्षीरं फलं पुष्पं भस्मतैलानि कण्टकाः ॥
पत्राणि शुङ्गाः कन्दाश्च प्ररोहश्चौद्भिदो गणः"।
इति चरके सूत्रस्थाने। १ अः ॥)

औद्वाहिकं, क्ली, (उद्वाहसमये लब्धम्। उद्वाह + ठञ्।) भार्य्याप्राप्तिकाले लब्धं भार्य्याधनम्। इति दायभागः ॥ तत् भ्रातृभिरविभाज्यम्। यथा।
"पितृद्रव्याविनाशेन यदन्यत् स्वयमर्ज्जयेत्।
मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत् ॥
इति याज्ञवल्क्यः ॥ (यथा च मनुः। ९। २०६।
"विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौद्वाहिकञ्चैव माधुपर्किकमेव च" ॥)

औपगवः, पुं, उपगोरपत्यम्। इति भरतः ॥ उप समीपे गौर्यस्य इति उपगुर्गोपः। लक्षणया तत्पुरोहिते उपगुशब्दः। यथा हारीतः।
"यं वर्णं याजयेद् यस्तु स तद्वर्णत्वमाप्नुयात्
सद्योवर्णेण वर्णैश्चैवमेवाब्रवीद्भृगुः" ॥*॥ तथाच लक्षणया ब्राह्मण उपगुपदवाच्यः। तस्यापत्यमौपगवः। इति श्रीभागवतटीकायां स्वामी। (उपगोरिदमिति व्युत्पत्त्या उपगुसम्बन्धिनि, त्रि- उपगु + "तस्येदम्"। ४। ३। १२०। इत्यण् ।)

औपगवकं, क्ली, (औपगवानां समूहः। "गोत्रोक्षो-ष्ट्रेति"। ४। २। ३९। वुञ्।) औपगवसमूहः। इत्यमरः ॥

औपग्रस्तिकः, पुं, (उपग्रस्तं ग्रासकालं भूतः। उप- ग्रस्त + "तमधीष्टो भृतो भूतो भावी"। ५। १। इति ठञ्।) राहुग्रस्तचन्द्रः सूर्य्यश्च। इति शब्द- रत्नावली ॥

औपनिधिकं, क्ली, (उपनिधि + स्वार्थे ठञ्।) उपनिधिः। प्रीत्या भोगार्थमर्पितद्रव्यम्। इति स्मृतिः ॥

औपम्यं, क्ली, (उपमैव। चतुर्व्वर्णादित्वात् स्वार्थे ष्यञ्।) सादृश्यम्। तत्पर्य्यायः। अनुकारः २ अनुहारः ३ साम्यम् ४ तुला ५ उपमा ६ कक्षः ७ उपमानम् ८। इति हेमचन्द्रः ॥ (यथा, हितोपदेशे १। ७३ ॥
"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः" ॥
"औपम्यं नाम यदन्येनान्यस्य सादृश्यमधिकृत्य प्रकाशनम्। यथा दण्डेन दण्डकस्य धनुषा धानु- ष्कस्येष्वासेनारोग्यदस्येति"। इति विमानस्थाने। ८ अध्याये ॥ चरकेणोक्तम् ॥)

औपयिकः, त्रि, (उपायेन सञ्जातः। उपाय + ठक् + ह्रस्वश्च।) न्याय्यः। उपयुक्तः। इत्यमरः ॥ (यथा, महाभारते विदुरागमनपर्व्वणि १। २०५। १२।
"एतत्तव महाराज तेषु पुत्त्रेषु चैव ह।
वृत्तमौपयिकं मन्ये भीष्मेण सह भारत"। ॥
तथा रामायणे २। ५४। ३९।
"वासमौपयिकं मन्ये तव राम महाबल"।
स्त्रियां तु ङीप्। यथा महाभारते वैवाहिक- पर्व्वणि १। १९४। ११।
"न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजानां कथयन्ति वीराः" ॥
स्वार्थे विनयादिभ्यष्ठक्प्रत्यये कृते उपाय एव औप- यिकम्। यथा भारविः, ३५।
"शिवमौपयिकं गरीयसीम्" इति ॥

औपरोधिकः, पुं, (उपरोधः प्रयोजनमस्य। उपरोध + ठक्।) पीलुदण्डः। तत्पर्य्यायः। पैलवः २। इति हेमचन्द्रः ॥ उपरोधसम्बन्धिनि त्रि ॥

औपवस्तं, क्ली, (उपवस्त + प्रज्ञाद्यण्।) उपवासः। इति हेमचन्द्रः ॥

औपसर्गिकः, पुं, (उपसर्ग + ठक्।) सन्निपातरोग- विशेषः। तस्य लक्षणम्। यथा,—
"कफोऽनुलोमवातेन यदि पित्तानुगो भवेत्।
खेदशैत्यादिभिर्जुष्टस्तदा भवति मानवः ॥
प्रतिलोमः पुनस्तेन स्वास्थ्यमायाति तत्क्षणात्।
औपसर्गिक एवान्यः सन्निपात उदाहृतः" ॥
इति वैद्यकम् ॥ उपसर्गसम्बन्धिनि त्रि ॥ ("तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकाल- जातो व्याधिरुपसृजति स तन्मूल एवोपद्रव- संज्ञः"। इति सुश्रुते सूत्रस्थाने। ३५ अध्याये ॥
"प्रसङ्गात् गात्रसंस्पर्शान्निश्वासात् सहभोजनात्।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्" ॥
इति च सुश्रुते निदानस्थाने। ५ अध्याये ॥ माधवसंग्रहस्य व्याख्यायां कुष्ठाधिकारे यथा। "औपसर्गिकरोगा इति औपसर्गिकाः पापरोगा- दयो भूतोपसर्गजाः संक्रामन्ति आविशन्ति" ॥)

औपस्थ्यं, क्ली, (उपस्थाद्भवम्। उपस्थ + ष्यञ्।) उप- स्थेन्द्रियसुखम्। इति श्रीभागवतम् ॥ (यथा, तत्रैव ७। ६। १३।
"औपस्थ्यजैह्व्यं बहु मन्यमानः
कथं विरज्येत दुरन्तमोहः" ॥)

औमीनं, त्रि, (उमानां भवनं क्षेत्रं वा। "विभाषा- तिलमाषोमेति"। ५। २। ४। पक्षे खञ्।) उम्यम्। उमाक्षेत्रम्। इत्यमरटीकायां भरतः ॥ मसिनार क्षेत इति भाषा ॥

औरगं, क्ली, (उरगस्य इदम्। उरग + अण्।) अश्ले- षानक्षत्रम्। इति जटाधरः। सर्पसम्बन्धिनि त्रि ॥

औरभ्रः, पुं, (उरभ्रस्य मेषस्य इदम्। उरभ्र + अण्।) कम्बलः। तत्पर्य्यायः। उर्णायुः २ आविकः ३ रल्लकः ४। इति हेमचन्द्रः ॥ (मेषमांसम्। यथा मनुः। ३। २६८।
"द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै" ॥
मेषदुग्धम्। यथा,—
"औरभ्रं मधुरं रूक्षमुष्णं वातकफापहम्।
न शस्त रक्तपित्तानां वातिकानां हितं भवेत्" ॥
इति हारीते प्रथमस्थाने। ८ अध्याये ॥ धन्वन्तरिं प्रति प्रश्नकारकः ऋषिभेदः। यथा सुश्रुते सूत्रस्थाने १। "अथ खलु भगवन्तममर- वरमृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवो- दासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावत- करवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ॥)

औरभ्रकं, क्ली, (उरभ्राणां समूहः। उरभ्र + "गो- त्रोक्षोष्ट्रोरभ्रेति"। ४। २। ३९। वुञ्।) मेष- समूहः। इत्यमरः ॥ भेड़ार पाल इति भाषा ॥

औरसः, पुं स्त्री, (उरसा निर्म्मितः। उरस् अण्।) स्वजातपुत्त्रः। तत्पर्य्यायः। औरस्यः २। इत्य- मरः ॥ उरस्यः ३। इति तट्टीका ॥ द्वादशविध- पुत्त्रान्तर्गतश्रेष्ठपुत्त्रोऽयम्। स तु सवर्णायां भा- र्य्यायां स्वयं जनितः। यथा। "सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं विद्यात्"। इति बौधायनः ॥ (तथा मनुः। ९। १६६।
"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात् पुत्त्रं प्रथमकल्पितम्" ॥)
"औरसो धर्म्मपत्नीजः" इत्यादि याज्ञवल्क्यः ॥ २। १३१ ॥

औरस्यः, पुं स्त्री, (उरसो भवः। उरस् + यत्। ततः स्वार्थेऽण्।) औरसपुत्त्रः। इत्यमरः ॥ (क्ली, उरसो वक्षस उत्पन्नम्। वक्षोभवम्। यथा शि- क्षायाम्। १६।
"हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्"।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्" ॥)

और्द्ध्वदेहिकं, त्रि, (ऊर्द्ध्वदेहाय भवम्। ऊर्द्ध्वदेह + ठञ्।) मृतार्थं तदहर्दानम्। इत्यमरः ॥ यदह्नि मृतस्तदहःप्रभृति सपिण्डीकरणात् पूर्व्वं प्रेत- तृप्तिहेतुकं यत् पिण्डादिदानं तत्। इति भरतः ॥ (पुत्त्रदाराद्यवश्यभर्त्तव्यपीड़नेन यत्पारलौकिक- धर्म्मबुद्ध्या दानादि करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवति।
यथा मनुः ११। १०।
"भृत्यानामुपरोधेन यत्करोत्यौर्द्ध्वदेहिकम्।
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च" ॥
तथा रामायणे २। ७७। ३।
"दासीर्दासांश्च यानानि वेश्मानि सुमहान्ति च।
ब्राह्मणेभ्यो ददौ पुत्त्रो राज्ञस्तस्यौर्द्ध्वदेहिकम्" ॥
(और्द्ध्वदैहिकम् इत्यपि स्यात् ॥)

और्द्ध्वस्रोतसिकः, त्रि, (ऊर्द्ध्वस्रोतस् + ठञ्।) शैवः। इति त्रिकाण्डशेषः ॥ (और्द्ध्वस्रोतसिकः। इत्यपि स्यात् ॥)

और्व्वं, क्ली, (उर्व्व्या भवम्। उर्व्वी + अण्।) पांशु- लवणम्। इति राजनिर्घण्टः ॥

और्व्वः, पुं, (और्व्वात् भृगुवंशीयात् ऋषेर्जातः। और्व्व + अण्। और्व्वर्षिक्रोधजत्वात्तथात्वम्।) वाड़- वानलः। इत्यमरः ॥ स तु भूगोलस्य दक्षिण- सीमा। तत्र सर्व्वे नरकाः दैत्याश्च वसन्ति। इति सिद्धान्तशिरोमणिः ॥ स्वनामख्यातो भृगुवंशीय- ऋषिभेदः। तज्जन्मादिकथा, महाभारते चैत्ररथ- पर्व्वणि १७९ अध्याये। उक्ता। यथा,—